श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-१०

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 2 वर्षः - 2015-16

प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकौ
डॉ. पङ्कजकुमारः रावलः
डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

Scanned with CamScanner

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-१०

# वाक्यार्थज्योतिः

वर्षः 2015-16

अङ्कः - 2

प्रधानसम्पादकः

प्रो. अर्कनाथचौधरी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

सम्पादकौ

डॉ. पङ्कजकुमारः रावलः

डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

Scanned with CamScanner

**प्रकाशकः -**

**प्रो. महेन्द्रकुमारः दवे**
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च -**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, Veraval - 2018***

**प्रथमं संस्करणम् -** मई - २०१८

**प्रतयः -** ३५०

**ISBN -** 978-93-83097-27-2

**मूल्यम् -** रु. २०० /-

**मुद्रकः -** जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

Shree Somnath Sanskrit University Grantha Series - 10

# VĀKYĀRTHAJYOTIḤ

Issue - 2 Year - 2015-16

Chief Editor
**Pro. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

Editors
**Dr. Pankajkumar Rawal**
**Dr. Satrughna Panigrahi**

**Shree Somnath Sanskrit University - Veraval - Gujarat**

Scanned with CamScanner

**Published by :**

Prof. Mahendrakumar Dave
The Registrar (I/c.)
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist. Gir-Somnath, Gujarat, India.
Phone : 02876-244532, Fax : 02876-244417
www.sssu.ac.in

**Assistant Editor & Co-ordinator :**

Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

© ***Shree Somnath Sanskrit University, Veraval - 2018***

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

| | | |
|---|---|---|
| **Edition** | : | First |
| **Year** | : | May - 2018 |
| **Copies** | : | 350 |
| **ISBN** | : | 978-93-83097-27-2 |
| **Price** | : | रु. 200 /- |
| **Printed by:** | | JALARAM GRAPHICS & OFFSET<br>Nr. Paramhans Apartment, B/h. Hotel Kaveri,<br>S.T. Road, Veraval - 362 266<br>Dist. Gir Somnath, Gujarat, India<br>Tel. (02876) 221861 |

Scanned with CamScanner

# वैदिकदेवशास्त्रम्

प्रो. देवेन्द्रनाथपाण्डेयः
अध्यक्षः, वेदविभागः
श्री सोमनाथसंस्कृत विश्वविद्यालयः,वेरावलम्

अपौरुषेयात्मको[1] वेदः प्रकृतौ चैतन्यतत्त्वं[2], देवतत्त्वं च सर्वदा पश्यति प्रमाणयति च। तथा च तादृशीं प्रकृतिं अवतारयति देवता-रूपेण विभिन्नेषु[3] यज्ञेषु। वैदिक क्रतुविज्ञानं प्रकृतेः वर्गीकृतां शक्तिमाश्रित्यैव प्रवर्तते, यज्ञफलञ्च[4] साधयति। एतदस्ति वैदिकदेवशास्त्रमेव यत् चैतन्योपेतमाकारं देवतारूपेणोपस्थाप्योपासनायाः फलरूपेणाध्यात्मिकदृष्ट्या[5] निराकारं निर्गुणं, व्यापकं नित्यञ्च–[6]सत्–चित्–आनन्दरूपं ब्रह्म – स्वरूपमपि उपनिषद्भागे चिन्तयति। एतदस्ति विभुत्वमस्य वैदिक–देवशास्त्रस्य।

वेदः यानपि नियमान् विश्वमानवकल्याणाय सूचयति तेषां विस्तृतं विवरणं मन्वादिभिः रचितेषु स्मृत्यादिग्रन्थेषु प्राप्यते[7]। तेषां नियमानां परिपालनाय, प्रकृतेः पर्यावरणरक्षणाय तन्माध्यमेन च पृथिव्याः शान्त्यै काश्चन वैदिक देवताः शासकत्वेन वेदेषु परिकल्पिताः सन्ति। तेषां विधानशास्त्रमेव वैदिक – देवशास्त्रमित्युच्यते। केचन पुराकल्पादीनां विषयप्रवर्तकानां देवानामेव[8] विषयचिन्तनादिकं देवशास्त्रं मन्वते।

शोध – पत्रमिदं निम्नस्थान् विषयान् वैदिक – देवशास्त्र – सन्दर्भे परिशीलयति–

Scanned with CamScanner

सामान्या प्रकृतिः - देवतत्त्वञ्च -

वैदिकसाहित्ये प्रकृतेः तत्स्वरूपं न व्याख्यातमपि यद्वयमवकलयामः प्रत्युत् नासदीयसूक्तादीनां, परिशीलनेन सर्वप्रथमं प्रकृतिः प्राणवती वर्तते इति प्रमाणी भवति।

अनेन प्रकारेण स्पन्दनात्मकं स्वरूपं प्रकृतेः अस्माकं पुरः स्फुरति । आनीदवातं[9] स्वधया चरन्तमित्यत्र प्रत्येकं पदं निर्विशेषरूपेण सम्पूर्णां प्रकृतिघटकरूपां पञ्चभूतात्मिकां नित्यां शक्तिं विश्लेषयति । तेनैतदवगम्यते यदग्न्यादिपञ्चभूतानि प्राणवन्ति [10] सन्ति, तत्संयोगेन प्राणिनोऽपि प्राणवन्तः सर्वे दृष्टिपथमस्माकम् आयान्ति । अस्मादेव कारणात् प्रकृतेः प्रथमघटकतत्त्वरूपेणाद्यमृगवेदीयमग्निसूक्तं वैदिकसाहित्यं स्मरति । तत्रापि अग्निः चैतन्यरूपेण बहुस्तुतोऽस्ति । "अग्निम् इडे" = अग्निमहं स्तौमि स च अग्निरस्य सूक्तस्य देवता पुरोहित रूपेणाप्यत्र स्तुतः ।[11] चैतन्योपेतस्यैव स्तुतयो भवन्ति, तत्रैव च स्पन्दनं (Vibration) दृश्यते । तस्मादेतत् सिध्यति यत् वैदिकसाहित्ये सामान्याप्रकृतिः स्वकीयघटकतत्त्वेष्वेव तिष्ठति, तानि च घटकतत्त्वानि चैतन्योपेतानि देवत्वोपेतानि सन्ति । महात्मा अरविन्दः अपि अग्नितत्त्वं पारमार्थिकतत्त्वरूपेण यत् पश्यति, तच्चैतन्यधर्ममाश्रित्यैवेति वक्तुं शक्यते। तादृशीं प्रकृतिमेवोपगृह्य प्रवर्तितं सांख्यदर्शनं नित्य तत्त्व रूपेण प्रतिपादयति, पुरुषसूक्तमाधारीकृत्य तत्र प्रकृतौ चैतन्यमाधत्ते[12] । एतत् सर्वं वैदिक देवशास्त्रस्यैव वैज्ञानिकं विलसितमस्तीति प्रतिपादने गौरवमेव।

वैदिकसाहित्यस्य देवशास्त्रं प्राणान् संचारयति प्रकृतिविलासे यस्मात्कारणादेकस्याः प्रवृत्तेरेकब्रह्मतत्त्व- विचारः[13] प्रभवति, तस्माच्च बहुदेववादस्य प्रादुर्भावो दृश्यते।

Scanned with CamScanner

यद्यपि जगतः सृष्टिविषये देवानां मनुष्याणाञ्च प्रादुर्भावविषये वेदे बाहुल्येन प्रतिपादिस्तथापि मूलरूपेण प्रकृतिप्रपंच एव देवत्वेनावतरतीति वैदिक – साहित्यविश्लेषणेनावगम्यते उक्तं यथा "अग्निर्देवता वातोदेवता. इत्यादि।"[14]

**वैदिकयज्ञः देवता च –**

वेदा हि यज्ञार्थामभिप्रवृत्तेति[15] वाक्यं सृष्टेरनन्तरं प्राणिनां क्रियाबाहुल्यं जीवनव्यवस्थां, तत्र च पञ्चमहाभूतानां रचनात्मिकाभूमिकां स्मारयति। वैदिक–यज्ञसिद्धान्तोपरि बहवो लेखाः विचाराः शोधप्रबन्धाश्च उपलब्धा अद्य दृश्यन्ते येषु यज्ञानां व्यापकं स्वरूपं प्रतिपादितमस्ति। अत्र च पुनः तदतिरिच्यान्यं वैज्ञानिकं स्वरूपं प्रतिपाद्यते। तत्सन्दर्भैतदवगन्तव्यमस्ति यत् यज्ञतत्त्वे–द्रव्य[16]–देवतयोः स्वाभाविकः सम्बन्धः दृश्यते। अत्रावधेयमस्ति यत्प्रकृतिः जनयत्यन्नं जलमृत्तिका – बीज संयोगेन। तत्र तद्बीजतत्त्वं कुतः कदा च प्राप्तमभूदित्यत्र ब्राह्मणादिस्मृत्यादिग्रन्थेषु भूयान् विचारोऽवलोक्यते। तत्र सृष्टिक्रमे क्रमिको विकासोऽपि द्रव्याणां शास्त्रेषु दृश्यते। तस्य संकेतः वैदिकयज्ञपरिपाट्याऽवलोक्यते। यज्ञाद्भवति[17] पर्जन्यः पर्जन्याद्वृष्टिसंभवः, तथा च श्रौतविचारोऽप्यत्रद्रष्टव्यः यत्प्रतिपादयति यत् यज्ञात् सृष्टिरपि[18] भवति। तस्मादेतदनुमीयते यत् सर्वासृष्टिरजायत यज्ञादेव। यज्ञे काचित् रसायनक्रिया अभविष्यत् येन चैतन्य – संयोगोजातः तन्माध्यमेन सर्वविधप्राणिनां पादपानां पशूनाञ्चोत्पत्तिरजायत। एतद्विधिर्नास्त्यत्यन्तदुर्गाह्यो दुर्बोध्यो वा। यज्ञे यज्ञीय पदार्थानां होमो जायते। यस्य परिपाको विधीयतेऽग्निना। तत्सामर्थ्यमेवाग्नेः दिव्यं देवतात्वं प्रमाणयति। सर्वेषां पदार्थानां परिपाकेन – समेकीभूतो यो ह्यंशः आकाश प्रति गच्छति तत्र

सूर्यरश्मिसकाशात् नभसः संयोगात् चन्द्रमसः नक्षत्राणाञ्चोर्जासंक्रान्तिकारणादन्नबीजानां सूक्ष्मोत्पत्तिर्भवति । तच्चार्षदृष्ट्यैवावलोकनासंभवात् तत्र सामान्यजनग्राह्यबुद्धि- प्रसृतिरस्ति असंभवा। आधुनिकविज्ञानमपि ऊर्जाणां पारस्परिकसंयोगवियोगमात्रा-विशेषमाध्यमेन रसायनतत्त्वविशेषोत्पत्तिरभविष्यत् पुरा । प्रारंभिकावस्थायां यज्ञानुष्ठानसन्दर्भे ग्रीष्मादि ऋतूनामाज्यादि-[19] द्रव्यरूपेण-स्मरणादप्येष सिद्धान्तः प्रामणितो भवति । "सूर्य आत्मा जगतः"[20] इत्यनेनापि यज्ञमाध्यमेनोर्ज्जाणां प्रादुर्भावः द्वादशमासा-धिष्ठातृषु सूर्येषु कस्यचित्सूर्यस्य तैजससंयोगादभदिति संभाव्यते।

**वैदिक – देवशास्त्रं दर्शनञ्च**

वैदिक – देवशास्त्रं भारतीय – संस्कृतिमपि पारमार्थिक तत्त्वेन पूरयति, जनयति च दैवीं शक्तिमपि तत्र, धार्मिकरूपेण भारतीयसंस्कृतौ दर्शनं धर्मतत्त्वस्याऽस्त्यन्यतमं घटकतत्त्वम् । धर्मतत्त्वेन च सह पुनः देवतत्त्वस्य स्वाभाविकः सम्बन्धोऽस्ति। तदपि यज्ञतत्त्वमाध्यमेनैव। उक्तं यथा यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।[21] वैदिकदेवशास्त्रं भारतीयदर्शन – सनातनधर्मयोः महतीं भूमिकां निर्वहति । वैदिकं – देवशास्त्रं नियामकमस्ति धर्मस्य दर्शनस्य च । अस्मादेवकारणादास्तिकभारतीयदर्शनेषु परमचैतन्यस्येश्वरस्य च स्पन्दनमनुभूयते । धर्मतत्त्वं वेदस्य व्यावहारिकं, दार्शनिकं, आध्यात्मिकञ्च स्वरूपं देवतत्त्वमाध्यमेनैव व्याख्याति । आरण्यकोपनिषत्सु देवतानां दार्शनिकं स्वरूपं , पारमार्थिकञ्च स्वरूपं वर्णितं विद्यते। वरुणसूक्तादिष्वपि[22] मोक्षतत्त्वोपदेशस्य संकेतेन वरुणादि देवानां दार्शनिकी भूमिका पारमार्थिकी च भूमिका दृश्यते।

यथा–

भवद्भूतस्य भव्यस्य जङ्गमस्थावरस्य च।

अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः॥

असतश्च सतश्चैव योनिरेष प्रजापतिः।

यदक्षरे च वाच्यं च यथैतद्ब्रह्म शाश्वतम्॥

कृत्वैष हि त्रिधात्मानम् एषु लोकेषु तिष्ठति।

देवान्यथायथं सर्वान् निवेश्य स्वेषु रश्मिषु॥[23]

एतैः श्लोकैः वैदिकदेवतानां दार्शनिकतत्त्वैः विषयैः च शाश्वतः सम्बन्धो दृश्यते। भारतीयदर्शनमपि श्लोकनिबद्धान् विषयान् विवेच्यैव ब्रह्मतत्त्वस्येश्वरतत्त्वस्य चैतन्यतत्त्वस्य मोक्षतत्त्वस्य, पञ्चभूततत्वानाञ्च वर्णनं विदधाति येन वैदिक – देवशास्त्रस्य दार्शनिकी भूमिका स्पष्टा भवति।

वैदिक–व्याख्याने देवशास्त्रम्–

मूलरूपेण सम्पूर्णस्य वैदिक वाङ्मयस्याधिभौतिकाधिदैविकाध्यात्मिकस्वरूपावगमनाय व्यवस्थितव्याख्यानं वैदिकमन्त्राणामावश्यकमस्ति । सार्वभौमिकता सर्वविषयसम्बद्धता, याज्ञिकविज्ञानविशिष्टता च लोकानां समक्षमागच्छेत् । तदर्थमस्माकं प्राचीनवैदिक – महर्षयः, वैदिक – व्याख्यातृ-मनीषिणश्च बहून् मार्गान् दर्शितवन्तः सन्ति – येषु ऋषिदेवताछन्दसां परिज्ञानं वैदिक - व्याख्यानायावश्यकस्तीति तैः प्रतिपादितम्–यथा–

वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः दैवतज्ञो हि मन्त्राणां तदर्थमवगच्छति॥[24]

अत्रैतद् विश्लिष्यते यत् वैदिकमन्त्राणां सामान्य–विशेषाः अर्थाः प्रासंगिकरूपेण भवन्ति। सामान्यार्थस्तु व्याकरणस्य सामान्यव्युत्पत्त्या,

Scanned with CamScanner

प्रातिशाख्यादीनाञ्चपरिज्ञानेन ज्ञातुं शक्योऽस्ति परन्तु प्रसंगविशेषस्य तात्पर्यावगमनाय, ऋषेश्चभावमवगन्तुमर्थ विशेषस्यापेक्षा भवति। एक एव मन्त्रः श्रौतकर्मसु स्मार्तकर्मसु च भिन्नतां विनियोगस्य भजते। तस्माद्व्याख्यानादेव विशेषप्रतिपत्तिर्भवति वैदिकमन्त्राणाम्–उक्तञ्च–

"व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलणम्" इति।[25]

अतः वैदिकमन्त्राणामर्थविशेषावगमनाय वैदिकदेवानां मन्त्रविशेषे स्मरणप्रवृत्तिनिमित्तज्ञानमावश्यकं भवति। तस्माद्वैदिक-देवानां विषये ज्ञानं वेदव्याख्यानायास्त्यावश्यकम्। अनेनैव विधिना वैदिकदेवानां वैज्ञानिक–स्वरूपमप्यवगन्तुं भौतिकशास्त्रदृष्ट्या शक्यते।

तदतिरिच्य वैदिकसाहित्येन भूयसी प्रभाविता भारतीया संस्कृतिः स्वकीयधार्मिकानुभागे नैतिकतत्त्वमपि व्याख्याति। तत्र नैतिकतत्त्वं वैदिकदेवानामाचरणच्छाया प्रतिभाति। दैवीगुणासुरिगुण-विवेचनावसरेऽपि गीतायां वैदिकदेवानामेव स्मरणं भवति। तन्मानवतागुणः, देवतागुणेन प्रभावितो हि संस्कृतधर्मशास्त्रे दृश्यते, यस्याचरणमस्माकं पूर्वजैर्विहितमस्ति प्रायोगिकरूपेण, यत्पालयितुं वयमपि मानवाः प्रवृत्ताः स्म।

अतः वैदिकदेवशास्त्रं भारतीयं धर्मशास्त्रम्, समाजशास्त्रम्, दर्शनशास्त्रम्, व्यवहारशास्त्रञ्च स्मृतिशास्त्र- माध्यमेन पोषयति। तथा च प्रकृतिप्रायोजितसंविधाना- नुकूलाचरणार्थमपि मानवान् प्रेरयति, येन पर्यावरणप्रदोषः समाजे न विकृतिमुत्पादयेत्। पर्वतेषु, वृक्षेषु, पशुषु नद्यादिष्वपि पारमार्थिकं तत्त्वं प्रदश्र्य सर्वान् प्राकृतिकपदार्थान् सजीवान्, देवतुल्यान् च संसाधयन् वैदिक् – देवशास्त्रमहिंसाभावं, दयाभावञ्च मानवेषु संचारयति, यत्कारणात् विश्वबन्धुत्वबन्धने निबद्धाः वयं मानवाः अनुभवामः।

Scanned with CamScanner

सन्दर्भा:

(१) अपौरुषेयं वाक्यं वेद: - अर्थसंग्रह: (लौगाक्षिभास्कर:)

(२) वह आधार, जिस पर वैदिकसाहित्य टिका हुआ है, अत्यन्त प्राचीन काल से चला आ रहा है, और वह यही विश्वास है कि प्रकृति की सभी वस्तुएँ तथा घटनाएँ जिनसे मनुष्य घिरा हुआ है, चेतन और दिव्य हैं – मैकडोनल(वैदिक माइथोलिजी हिन्दी अनुवाद – रामकुमार राय – पृ. ३, पैरा-२, प्रकाशन - चैखम्बाविद्याभवन द्वितीयसंस्करण - १९८४)

(३) ईड एह्यदित एहिकाम्यऽ एहि। मयि व: कामधरणम्भूयात्

–द्र. शु. प. वेद संहिता – ३/२७

(४) रत्नधातमम् – ऋग्वेद: १/१

सायणभाष्य – रत्नधातमम् = रमणीयानां धनानां दातृतमम् –

(५) अथाध्यात्मं वागेवर्क प्राण: साम तदेतदेतस्यामृच्यध्यूढं साम ।......चक्षुरेवर्गात्मा साम – छा. उप. /७/१

-ईशाद्यष्टोत्तरशतोपनिषद: - श्री वासुदेवशर्मा – चौखम्बाविद्याभवन – प्र. १९९१

(६) अहं ब्रह्मास्मि, अहं ब्रह्मास्मि, अहं ब्रह्मेति निश्चय:।

चिदहं चिदहं चेति स जीवनमुक्त उच्यते।

आनन्दात्मा प्रियोह्यात्मा मोक्षात्मा बन्धवर्जित: - तेजो बिन्दूपनि. – ४/४/२९-३७-ईशा. चौ. विद्याभवन

(७) य: कश्चित्कस्यचिद्धर्मो मनुनापरिकीर्तित:।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि स: - मनुस्मृति – २/७

(८) द्र. वैदिकमाइथोलोजी – मैक्डानल – पृ. १

Scanned with CamScanner

(९) ऋग्वेदः - १०/२९/२

(१०) अभिज्ञानशाकुन्तलम् (कालिदास) मंगलाचरण –

"यामाहुः सर्वबीजप्रकृतिरितियया प्राणिनः प्राणवन्तः"

मोतीलालबना.दास – एम्. आर. काले. पृ. २

(११) अथाकारचिन्तनं देवतानाम्। पुरुषविधाः स्युरित्येकम्।

चेतनावद्वद्धि स्तुतयो भवन्ति – निरुक्त – ७/६/६

(१२) The Sankhya Aphorismas –

"न नित्यशुद्ध बुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" – १९-(Kapil) J.R. Ballontyne – The Chowkhamba Sanskrit Studies – vol. xxxiv – 1963

(१३) द्र. वैदिकमाइथोलोजी – रामकु. राय पृ. ५

(१४) अग्निर्देवता वातो देवता सूर्योदेवता चन्द्रमादेवता वसवोदेवता.– माध्यान्दिनसंहिता - १४/२०

(१५) वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं, यो ज्योतिषं वेद सं वेद यज्ञम्

वेदाङ्गज्योतिष, याजुष. श्लोक. ३ द्र. वैदिक सा. एवं संस्कृति – पृ. २०४

डो. कपिलदेव द्विवेदी विश्वविद्यालयप्रकाशन चौक, वाराणसी,

द्वि. सं. २००४

(१६) द्रव्यं देवता त्यागः-द्र. कात्या. श्रौ. सू. १/२३, कर्कभाष्य, सम्पा.आचार्य पट्टाभिरामशास्त्री, श्रीलालब. शा. के. सं. विद्यापीठ,नूतनदिल्ली १९८३

(१७) श्रीमद्भगवद्गीता – अ. ३/१४-१५

Scanned with CamScanner

(१८) यथा याज्ञसेन्याः जन्म

(१९) द्र. रुद्राष्टाध्यायी – २/१४

(२०) द्र. ऋग्वेद – १/११५/१

(२१) द्र. रुद्राष्टाध्यायी – २/१६

(२२) द्र. ऋ. १/२४/१५

(२३) द्र. बृहद्देवता(शौनक) अनुवाद – A.A. मैक्डोनल – प्रकाशन – शिवालिक – प्रकाशन – दिल्ली

(२४) द्र. बृ. देवता सन्दर्भः पूर्ववत् – १/२

(२५) द्र. परिभाषेन्दुशेखर – परि. २

Scanned with CamScanner